द्वादशः पाठः १२

# पर्यावरणचेतना

## ( यण् सन्धिः )

(पर्यावरणं प्रति ज्ञानं जागरुकता च वर्तमानकालस्य आवश्यकता अस्ति। पर्यावरणस्य हानिकारकाणि तत्त्वानि रक्षणोपायान् च वयं पाठेऽस्मिन् ज्ञास्यामः ।)

भौतिकपर्यावरणे प्रकृत्या प्रदत्तं प्राणतत्वं रक्षाकवचं च वर्तते। जीवमात्रस्य विकासाय पर्यावरणशुद्धिः आवश्यकी वर्तते। अस्मान् परितः यत् आवरणम् तत् पर्यावरणम्। पर्यावरणे पृथिवी, आकाशः, वायुः, जलम्, अग्निः **इत्येतानि** पञ्चतत्वानि सन्ति। एतेषां तत्वानां दूषणेन **पर्यावरणं** प्रदूषितं **भवेत्येव।**

सम्प्रति न केवलं भारते अपितु समस्ते भूमण्डले प्राकृतिकम् असन्तुलनं समुत्पन्नम्। कुत्रचिद् अनावृष्टिः कुत्रचित् अल्पवृष्टिः अतिवृष्टिः च भवति साम्प्रतम्। जनानाम् आवश्यकतापूर्तये उद्योगानां , राजमार्गाणां जलबन्धानां रेलमार्गाणां सञ्चारसाधनानां च विस्तारः अपेक्षितः अतः स्वार्थवशात् मानवेन प्रकृतिकोषात् मृत्तिक-प्रस्तर-धातु-काष्ठादीनि परिलुण्ठितानि। यदि इत्थमेव प्रदूषणेन तापवृद्धिः भवेत् **तर्ह्यवश्यमेव** ध्रुवक्षेत्रे हिमगलनेन जलप्रलयः भविष्यति।

भूमि-जल-वायु-ध्वनि प्रदूषणानि चिन्तनीयानि। **वायवः** कीटाणून् इतस्ततः नयन्ति, वायोः अभावेन न जीवधारिणः जीवन्ति । कीटनाशकानां वर्धमानेन प्रयोगेण पृथिव्याः अन्नफलादीनि प्रदूषितानि जातानि। महानगरेषु वाहनानां निर्बाधप्रचलनेन, ध्वनिप्रसारयन्त्रद्वारा विज्ञापनेन, नूतनयन्त्राणां नादेन च कर्णस्फोटकध्वनिः अहोरात्रम् उत्पद्यते । तेन मानवस्य मनसः शान्तिः विलुप्ता । जनाः अनिद्रारोगेण विक्षिप्ताः इव सन्ति। नदीतडागनिर्झरेषु अवशिष्टवस्तूनाम् आवाञ्छितवस्तूनां च क्षेपणेन जलं प्रदूषितं भवति। वाहनानां धूमः यन्त्रागारेभ्यः निर्गच्छद् वायुः च वायुमण्डलं दूषयति।

अतः अस्माकं सर्वेषां दायित्वम् अस्ति यत् यानि **कान्यपि** प्रदूषणानि जायमानानि सन्ति , तानि निवारयितुं प्रयासं करवाम। प्रदूषणानि न भवेयुः तथा उपायान् अपि चिन्तयाम।



भारतीयसंस्कृतिः पर्यावरणस्य सम्पोषिका अस्ति। पादपानां संरक्षणम् अस्माकं परम्परा वर्तते। पूर्वजानां सुशिक्षायाः कारणादेव जोधपुरस्य समीपे खेजडली ग्रामे अमृतादेव्याः नेतृत्वे शमीवृक्षाणां संरक्षणार्थं ३६३ पुरुषाः महिलाश्च स्वप्राणरक्षणस्य चिन्ताम् अकृत्वा शिरोश्छेदनं कारितवन्तः। विश्वेऽस्मिन् वृक्षरक्षणार्थं स्वप्राणदानस्य इयम् विश्वस्य अद्वितीयघटना अस्ति । उत्तराखण्डे सुन्दरलालबहुगुणस्य नेतृत्वे वृक्षाणां रक्षार्थम् आलिङ्गनान्दोलनं (चिपको-आन्दोलन) सञ्चालितम्। **प्रत्येकस्मिन्** वर्षे जूनमासस्य पञ्चमे दिनाङ्के 'विश्वपर्यावरणदिवसः' आचर्यते। भारतसर्वकारः पर्यावरणसंरक्षणाय एव 'स्वच्छभारताभियानम्' 'निर्मलगङ्गायोजनां' च सञ्चालयति।

पर्यावरणप्रदूषणस्य निरोधाय जनाः यत्र तत्र मलमूत्रप्रक्षेपणं न कृत्वा प्रत्येकस्मिन् गृहे शौचालयस्य निर्माणं कारयेयुः। बालकाः युवकाः कृषकाः युवत्यः च विद्यालयेषु, उद्यानेषु, गृहोद्यानेषु क्षेत्रेष्वाधिक्येन वृक्षारोपणं कुर्युः। वृक्षच्छेदकानां कृते कठोरदण्डव्यवस्था भवेत्। महानगरेषु मध्ये-मध्ये सघनानां हरितानाम् उद्यानानां विकासेन वायुप्रदूषणं **न्यूनं** कर्तुं शक्यते।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| प्रकृत्या | दैवेन | प्रकृति के द्वारा |
| परितः | चतुर्दिशासु | चारों ओर |
| तेजांसि | तपांसि | तेज |
| प्रदूषितम् | मलिनम् | अशुद्ध |
| समुत्पन्नम् | प्रादुर्भूतम् | उत्पन्न |
| कुत्रचित् | कस्मिंश्चित् स्थाने | कहीं भी |
| साम्प्रतम् | अधुना | अब |
| अनावृष्टिः | वृष्टेः अभावः | अकाल |
| परिलुण्ठितानि | चोरितानि | लूटे गये |
| इतस्ततः | यत्र तत्र | इधर उधर |
| नादेन | ध्वनिना | आवाज से |
| अहोरात्रम् | अहर्निशम् | दिनरात |
| उत्पद्यते | उत्पन्नः भवति | उत्पन्न होता है |

| | | |
|---|---|---|
| विलुप्ता | समाप्ता | समाप्त |
| तडागः | सरोवरः | तालाब |
| स्वप्राणदानस्य | आत्मप्राणानां त्यागस्य | अपने प्राण देने की |
| आलिङ्गनान्दोनम् | चिपको आन्दोलनम् नाम्ना प्रसिद्धम् | चिपको आन्दोलन |
| वृक्षच्छेदकानाम् | तरूणां कर्तकानाम् | पेड़ काटने वालों का |
| द्रुमः | वृक्षः | पेड़ |

## अभ्यासः

१. **निम्नलिखितपदानाम् उच्चारणं कुरुत -**

पृथिव्याकाशः, अनावृष्टिः, मृत्प्रस्तरकाष्ठादीनि, परिलुण्ठितानि, निर्बाधप्रचलनेन, कर्णविस्फोटकध्वनिः, अनिद्रारोगेण, स्वच्छभारताभियानम्, शिरश्छेदनम्, कारितवन्तः।

२. **एकेन शब्देन उत्तरत -**

(क) वायवः कान् इतस्ततः नयन्ति ?

(ख) के अनिद्रारोगेण विक्षिप्ता इव सन्ति ?

(ग) भारतीयसंस्कृतिः कस्य सम्पोषिका अस्ति ?

(घ) केषां कृते कठोरदण्डव्यवस्था भवेत् ?

(ङ) केषां रोपणं फलदायकम् अस्ति ?

३. **अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -**

(क) पर्यावरणे कानि-कानि तत्वानि सन्ति ?

(ख) खेजडलीग्रामे शमीवृक्षाणां संरक्षणार्थं कियन्तः जनाः शिरश्छेदनं कारितवन्तः ?

(ग) पर्यावरणदिवसः कदा आयोज्यते ?

(घ) वृक्षरक्षणार्थं स्वप्राणदानस्य घटना कस्मिन् ग्रामे अभवत् ?

(ङ) भारतसर्वकारः पर्यावरणसंरक्षणार्थं कानि अभियानानि चालयति ?

## ४. कोष्ठकेभ्यः उचितपदानि चित्वा वाक्यानि पूरयत -

(क) वाहनानां धूमः यन्त्रागारेभ्यः निर्गच्छत् वायुश्च ......................दूषयति ।

(जलमण्डलम् /वायुमण्डलम्)

(ख) वृक्षाणां रक्षणार्थं आलिङ्गनान्दोलनम् ..............................अभवत् ।

(उत्तराखण्डे/उत्तरप्रदेशे )

(ग) जूनमासस्य पञ्चमे दिनाङ्के ............................भवति।

(विश्वपर्यावरणदिवसः/जलदिवसः )

(घ) पर्यावरणे ............................तत्त्वानि सन्ति। (पञ्च/सप्त)

(ङ) प्रसिद्धखेजडलीग्रामः ............................समीपे वर्तते। (जयपुरस्य/जोधपुरस्य)

## ५. उदाहरणानुसारं पदानां विभक्तिं वचनं च लिखत -

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा- | पर्यावरणे | सप्तमी | एकवचनम् |
| (क) | जलम् | .............. | .............. |
| (ख) | विकासस्य | .............. | .............. |
| (ग) | शिक्षायाः | .............. | .............. |
| (घ) | दूषणेन | .............. | .............. |
| (ङ) | घटना | .............. | .............. |

## ६. उचितविलोमपदानि योजयित्वा स्वाभ्यासपुस्तिकायां लिखत -

| | | |
|---|---|---|
| (क) | शुक्लपक्षः | तत्र |
| (ख) | दूषितम् | अनावश्यकम् |
| (ग) | तादृशी | कृष्णपक्ष |
| (घ) | अत्र | नाशनम् |
| (ङ) | रक्षणम् | निर्मलम् |
| (च) | आवश्यकम् | एतादृशी |

७. **भिन्नवर्गस्य पदं चिनुत -**

**यथा -** कोकिला , चटका , लता , शुका लता

(क) फलम् , पत्रम् , पुष्पम् , मित्रम् ----------

(ख) भोजनम् , जलम् , वार्तापत्रम् , दुग्धम् ----------

(ग) शिक्षिका , अध्यापिका , लेखिका , अभ्यासपुस्तिका ----------

(घ) आकाशः , चन्द्रः , मेघः , कर्णः ----------

८. **निम्नाङ्कितपदेभ्यः उपसर्गं चिनुत -**

| पदम् | उपसर्गः |
| --- | --- |
| **यथा -** प्रदूषणम् | प्र |
| आवरणम् | -------- |
| निर्गच्छत् | -------- |
| अवशिष्टः | -------- |
| प्रयोगेण | -------- |
| विलुप्ता | -------- |

९. **सत्यकथनस्य पुरतः ''आम्'' असत्यकथनस्य च पुरतः ''न'' इति लिखत -**

(क) प्रतिवर्षे जूनमासस्य सप्तमे दिनाङ्के ''विश्वपर्यावरण-दिवसः'' आचर्यते। [ ]

(ख) उत्तराखण्डे सुन्दरलालबहुगुणस्य नेतृत्वे वृक्षाणां रक्षणार्थम् ''आलिङ्गनान्दोलनम्'' चालितम्। [ ]

(ग) खेजडलीघटना वृक्षरक्षणार्थं जयपुरनगरस्य समीपे अभवत्। [ ]

(घ) भारतीया संस्कृतिः पर्यावरणस्य सम्पोषिका अस्ति। [ ]

## योग्यता-विस्तारः

१. वृक्षाणां महत्त्वस्य विषये पुराणेष्वपि उक्तम्-

दशकूपसमा वापी दशवापीसमो ह्रदः ।
दशह्रदसमः पुत्रः दशपुत्रसमो द्रुमः ।।



वृक्षाणां रोपणं फलदायकम् अस्ति इति महाभारतेऽपि लिखितम् -
'वृक्षाणां कर्तनं पापं वृक्षाणां रोपणं हितम् ।'

२. **सन्धिं जानीत -**

स्वरसन्धेः एकः भेदः **यण् सन्धिः** अस्ति। यण् अर्थात् य् व् र् ल् । य् व् र् ल् इति चत्वारः यणादेशाः सन्तिः।

एते कदा कस्य च स्थाने भवन्ति इति तालिकया जानीम।

इ + भिन्नः स्वरः (अ, उ, ऋ, लृ, ए, ऐ, ओ, औ) य्

उ + भिन्नः स्वरः (अ, इ, ऋ, लृ, ए, ऐ, ओ, औ) व्

ऋ + भिन्नः स्वरः (अ, इ, उ, लृ, ए, ऐ, ओ, औ) र्

लृ + भिन्नः स्वरः (अ, इ, उ, ऋ, ए, ऐ, ओ, औ) ल्

**यथा** – प्रति + अयः = प्रत्ययः
परि + आवरणम् = पर्यावरणम्
सु+आगतम् = स्वागतम्
पितृ + आज्ञा = पित्राज्ञा
लृ + आकृतिः = लाकृतिः

३.




**अध्यापकाय निर्देशः**

- शिक्षकः छात्राणां द्वारा वृक्षाणाम् उपयोगिताविषयकं नाट्यमञ्चनं कारयेत्। यस्मिन् ते बालाःवृक्षाणाम् अभिनयं कृत्वा स्वोपयोगितायाः विषयं प्रतिपादयेयुः। अत्र एतादृशानि अन्यविधनाटकानि अपि अभिनेयानि।